Académie
des Inscriptions
et Belles-Lettres

# शासनसाहित्यविद्याप्रतिष्ठानम्

१६३३ वत्सरे फ्रांस्-देशे ’लोवि १४’ इत्यभिधे महाराजे शासति, ’कोल्बेर्’ इति नाम्ना मुख्यमन्त्रिणा "शासनसाहित्यविद्याप्रतिष्ठानम्" इदं प्रतिष्ठापितमासीत्। इदञ्च ’फ्रांस्-देशस्य संस्थानम्’ इत्याख्यस्य महासंस्थानस्य पञ्चविद्यास्थानेष्वन्यतममस्ति।१८०५ वत्सरे ’लूव्र’ महावस्तुसंग्रहालयस्य सम्मुखे सैन्-नद्यास्तटे सुप्रसिद्धे गुम्मटसमन्विते महाप्रासादेऽवस्थापितमिदम् इदानीं तत्रैव विराजते।

आदौ राज्ञः प्रासादेषु मुद्रासु टङ्केषु च लेखनीयानां वाक्यानां कीर्तिमुद्राणां च लतिनभाषया फ्रांसीयभाषया चापेक्षितं रचनमस्य प्रतिष्ठानस्याधिकार आसीत्।१७०१ वत्सरे एकं परिवर्तनमभूत्।अद्यापि प्रयुज्यमानं नवीनं नाम नवीनोऽधिकारश्चेत्येतद् द्वयं तत्परिवर्तनजन्यमेव।सकलपूर्वापरदेशानां पुरातनसंस्कृतिविषये विज्ञानसंवर्धनं प्रचारश्चेत्येतावस्य नवीनावधिकारौ स्तः।वर्तमानकाले अमेरिकादिद्वीपान्तराणां पुरातनसंस्कृतिविषयेऽपि विमर्शोऽत्र विधीयते।इतिहासे पुरातत्त्वसमीक्षायां कलाचरित्रे भाषासाहित्यदर्शनविषयेष्वैतिहासिकविमर्शे संयुक्तानुशासनेषु च कार्याण्यत्र संसाध्यन्ते।

१६५६ वत्सरे प्रतिष्ठापितं ’पण्डितानां पत्रिका’ इति नामधेयं षाण्मासिकं शोधात्मकं पत्रकं निरन्तरमत्र प्रकाश्यमानमस्ति।तेन प्रतिष्ठानमिदं व्युत्पत्तेः पाण्डित्यस्य च पुरातनपरम्पराया निधानं वरिवृत्यत इति सुतरां साधीयमानमस्ति।विविधपुस्तकानां प्रकाशनेनाऽनेकेषां कार्याणां सम्पादनेन चास्य सुख्यातिः जगत्यां व्यतन्यत वितन्यतेतरां च।

स्वव्यवस्थानियमानुरोधेन प्रतिष्ठानपक्षतो विद्यासंवर्धनार्थं विमर्शगुणाधानार्थं च पारितोषिकाणि दीयमानानि सन्ति। विविधेषु सत्त्रेष्वायोज्यमानासु संगोष्ठीषु विशिष्टानि

प्रवचनानि पुरस्क्रियन्ते। तेन विमर्शानां नवीनोद्भावनानां च राष्ट्रियमन्ताराष्ट्रियं चानुरणनं बोभूयते।

विशिष्टेषु सांस्कृतिकेष्वैतिहासिकेष्वन्येषु चापेक्षितेषु प्रसङ्गेषु सर्वकारस्य पुरत आवश्यकीयं परामर्शं विशिष्टं च ज्ञापनं प्रस्तोतुमिदं प्रतिष्ठानमधिकृतं विद्यते। देशान्तरेषु प्रतिष्ठितेषु फ्रांसीयप्रतिष्ठानेषु संचाल्यमानानां वैज्ञानिकविषयाणां सैद्धान्तिकपक्षाननुशासितुं नियमयितुं चेदमधिकृतमस्ति। किं च शिक्षया विमर्शेन च सम्बद्धेषु फ्रांसीयेषु मुख्यप्रतिष्ठानेषु प्राध्यापकनियोजनविषयेऽस्य मतदानाधिकारोऽपि विद्यते।

एवमेवेदं 'शासनसाहित्यविद्याप्रतिष्ठानम्' ऐतिह्यस्य विश्ववैभवस्य च संरक्षणं सततस्मारणं च विधातुं तथा च विशिष्टानि शोधकार्याणि संचालयितुमद्वितीयप्रयोगशालारूपेण चकास्ति।